International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 123-133
© 2018 IJSR
www.anantaajournal.com
Received: 24-09-2018
Accepted: 25-10-2018

**स्वामी वेदार्थानन्द**
Department of Sanskrit and Philosophy, Ramakrishna Mission Vivekananda Educational and Research Institute, West Bengal, India

**Correspondence**
**स्वामी वेदार्थानन्द**
Department of Sanskrit and Philosophy, Ramakrishna Mission Vivekananda Educational and Research Institute, West Bengal, India

# अध्यासभाष्यारम्भग्रन्थमधि भामतीसुगमयोर्व्याख्यानवैशिष्ट्यम्

**स्वामी वेदार्थानन्द**

## अवतरणिका।

श्रीशङ्करभगवत्पादविरचितस्य शारीरकमीमांसाभाष्यस्य श्रीवाचस्पतिमिश्रेण (कालः – प्रायेण दशमशतकम्) कृता व्याख्या विराजते भामती। इमां व्याख्यां समाश्रित्य अमलानन्दसरस्वती (कालः – त्रयोदशशतकम्) वेदान्तकल्पतरुम् प्रणीय भामतीप्रस्थानस्य बीजावापमकरोत्। शारीरकभाष्यस्य उपोद्घातभूतस्य अध्यासभाष्यस्य आधुनिकी काचिद्व्याख्या सुगमाख्या (प्रकाशनवर्षम् – १९५५) च विद्यते। अस्याः प्रणेतारः श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनः (१८८०-१९७५) अभिनवशङ्कराचार्या इति कीर्तिमाप्तवन्तः मूलशाङ्करभाष्याणि समाश्रित्य भगवत्पादाभिमतायाः शुद्धवेदान्तप्रक्रियाया विनिर्णयाय यत्नमकुर्वन्। मूलाविद्यां सर्वथा भाष्यविरुद्धाम् मन्यमानाः इमे अध्यासस्य निरुपादानत्वं हि प्रतिपेदिरे। इदमेव स्पष्टाक्षरैः प्रतिपादयितुम् अध्यासभाष्यमधि इमे स्वामिनः सुगमाम् प्रणीतवन्तः।

यथाऽन्ये व्याख्यातारः तथैव भामतीसुगमाकारौ च अध्यासभाष्यस्य आक्षेपपरिहारग्रन्थयोर्व्याख्यानावसरे एव स्वाभिमताया अद्वैतव्याख्यानप्रक्रियायाः मर्मस्थानानि नानावाचोयुक्तिभिः प्रकाशयतः। अत्र लघुनिबन्धे अध्यासभाष्यारम्भग्रन्थयोः भामतीकारैः सुगमाकारैश्च कृते व्याख्याने ईदृशानि स्थानानि विविच्य तत्र परिलक्षिताः केचन मुख्यभेदाः समानताश्च काश्चिन्निरूप्यन्ते।

## १. अध्यासभाष्यस्य आक्षेपपरिहारग्रन्थयोः भामतीसुगमावचनानि।

”युष्मदस्मत्” इत्यारभ्य ”भवितुं युक्तम्” इत्येतावान् अध्यासभाष्यस्य आक्षेपग्रन्थः कथ्यते। अत्र अध्यासविषयिणी शङ्का समुत्थापितेति व्याख्यातॄणां सर्वेषामाशयः। इत्यारभ्य ”तथापि” शङ्कायाः ग्रन्थेऽस्मिन् पूर्वोत्थापितायाः ।इत्येतावान् परिहारग्रन्थः इत्युच्यते ”लोकव्यवहारः” परिहारः समुन्नीतः।

आक्षेपपरिहारग्रन्थयोः भामतीसुगमाव्याख्यानाभ्यां [पञ्चमीविभक्तिः] यानि वचनानि विशेषतः श्रद्धेयान्यत्र परिगृहीतानि तानि अधस्तात् प्रदर्श्यन्ते –

**आक्षेपग्रन्थे भामती।**

“एतदुक्तम् भवति – अध्यासो भेदाग्रहेण व्याप्तः, तद्विरुद्धश्च इहास्ति भेदग्रहः, स भेदाग्रहं निवर्तयन् तद्व्याप्तम् अध्यासमपि निवर्तयतीति मिथ्येति भवितुं युक्तं यद्यपि तथापीति योजना।” (पृ.६)[1]

**आक्षेपग्रन्थे सुगमा।**

"युष्मदस्मत्प्रत्ययगोचरयोः इत्यारभ्य मिथ्येति भवितुं युक्तम् इत्यन्तं तूक्ताध्यासो युक्त्या निरूप्यमाणो नोपपद्यत इति शङ्कासमुत्थापनार्थमिति विवेकः।" (पृ.३)

"अयमत्र सारः – यत्र धर्मिणोस्तादात्म्यसम्भवः तन्तुपटादाविव, यत्र वा केवलं तद्धर्माणाम् परस्परत्र सङ्क्रान्तिसम्भवः स्फटिकजपाकुसुमादाविव, तत्रैव धर्मिणोः परस्पराध्यासो धर्माणां वा परस्पराध्यासः सम्भवति नान्यत्र। यत्र पुनस्तयोर्धर्मिणोर्न सर्वथा तादात्म्यसम्भवः अत्यन्तविरुद्धस्वभावत्वात् तमःप्रकाशयोरिव, तत्र न धर्म्यध्यासो न वा धर्माध्यासः। विरुध्येते चात्यन्तं स्वभावेन आत्मानात्मानौ विषयित्वेन विषयत्वेन च प्रतीयमानौ, अतो न तयोरन्योन्याध्यासो न वा तद्धर्माणामन्योन्यस्मिन्नध्यासः सम्भवतीति।" (पृ.६-७)

**आक्षेपपरिहारग्रन्थयोस्तात्पर्यम्।**

**आक्षेपग्रन्थस्य भामत्यनुसारि तात्पर्यम्।**

**(परिहारग्रन्थे भामतीसूगमावनचानि कोष्ठकरूपेण अत्रैवान्ते १२-१४ -संख्याकपृष्ठयोः प्रदत्तानि।)**

अध्यासः मिथ्येति भवितुं युक्तमित्यन्तेन आक्षेपग्रन्थेन आत्मस्वरूपविचाररूपस्य शारीरकशास्त्रस्य अनारम्भकत्वम् पूर्वपक्षिणा प्रोक्तमाहुर्भामतीकृतः। एतत्सिद्ध्यर्थम् आत्मानात्मनोरध्यासस्य असम्भवत्वम् पूर्वपक्षिणा उपन्यस्तमिति मिश्राचार्याः मन्यन्ते।

तथा हि, यत्र यत्राध्यासः तत्र अधिष्ठानारोप्ययोर्भेदाग्रहः इति व्याप्तिरस्ति। भेदाग्रहमेव विवेकाग्रह इति शब्देनापि भामतीकाराः तत्र तत्र निर्दिशन्ति। ययोर्विवेको न गृहीतः तयोरेवाध्यासो जायते। तस्मात् आत्मानात्मनोरध्यासः तदैव सम्भवति यदा तयोर्मध्ये भेदाग्रहः स्यात्। किन्तु स्फुटतराहमनुभवगम्यस्य आत्मनः विषये न कस्यापि लोके संशयो विपर्ययो वा विद्यते। तदुक्तम् –”बृहत्त्वाद् बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते, स चायम् आ कीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्य इदङ्कारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेन अहमित्यसन्दिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम्”[2] इति। एवञ्च आत्मानात्मनोरध्यासः असम्भव इति पूर्वपक्षः।

आत्मानात्मनोरध्यासासम्भवादेव आत्मस्वरूपमसन्दिग्धमिति प्राप्ते तद्विषयिणी जिज्ञासा प्रेक्षावतां नोदेति। किञ्च, आत्मस्वरूपजिज्ञासायाः नास्ति संसारनिवृत्तिफलकत्वम्, संसारस्य आत्मानात्मस्वरूपविवेकेन [अथवा आत्मस्वरूपविज्ञानेन] सहावस्थानमस्तीत्यतः परस्परमविरोधात्। एवञ्च आत्मस्वरूपविषये सन्दिग्धत्वाभावात् आत्मस्वरूपज्ञानस्य सप्रयोजनत्वाभावाच्च आत्मयाथात्म्यविचारशास्त्रस्य प्रकृतस्य अनारम्भणीयतेति भामतीकाराः आक्षेपग्रन्थस्य तात्पर्यमाहुः।

**आक्षेपग्रन्थस्य सुगमानुसारि तात्पर्यम्।**

शङ्काग्रन्थेन सच्चिदानन्देन्द्रसरस्वतीस्वामिनः आत्मानात्मनोरितरेतराध्यासस्य युक्त्यसहत्वं दर्शयन्ति। आत्मानात्मनोः परस्परमध्यासो युक्त्या निरूप्यमाणो नोपपद्यते इति शङ्काग्रन्थोत्थापितम् मतं सिद्धान्तिसम्मतमेव मन्यन्ते

[1] एवमत्र लेखे प्रदर्शिताः पृष्टसंख्याः आचार्यजगदीशशास्त्रिसम्पादितस्य टीकात्रययुतस्य ब्रह्मसूत्रग्रन्थस्य भवन्ति।

[2] भामती १.१.१ (ब्रह्मसूत्रशाङ्करभाष्यं टीकात्रययुतम्, पृ.२)

स्वामिनः।

आत्मानात्मनोर्मध्ये योऽध्यासो दृष्टः स सर्वदाऽपि इतरेतराध्यास एवेति स्वामिनो द्रढयन्ति। अस्य इतरेतराध्यासस्य दृष्टान्तः कोऽप्यन्यो नोपलभ्यते। अत एव युक्त्यसहत्वम् अस्यापतितम्, युक्तेः दृष्टान्तसमाश्रयणपूर्वकम् प्रवृत्तेः। तस्मात् शुक्तिरजतादिदृष्टान्तेन आत्मानात्मनोरध्यासो नोपपादनीयः। आत्मानात्मनोर्मध्ये सर्वदा इतरेतराध्यासः खलु भवति। नात्र दृष्टान्तः कोऽप्यस्ति। नन्वध्यासभाष्ये भगवत्पूज्यपादाः आत्मानात्मनोः इतरेतराध्यासमुक्त्वा ततः अन्यस्मिन् अन्यधर्माध्यासं दृष्टान्तीकुर्वन्तीति चेदुच्यते – न, इतरेतराध्यासः केवलम् आत्मानात्मनोर्मध्ये एव, नान्यत्रास्ति। अस्ति चेत्खलु दृष्टान्तत्वेन उपादीयेत। ननु तर्हि भगवत्पादैः आत्मानात्मनोर्मध्येऽध्यासमुपन्यस्य किमर्थं लक्षणं दृष्टान्तश्च प्रदर्श्येते इति चेदुच्यते – अध्यासो लोके प्रसिद्ध इत्येतावद्दर्शयितुं तौ प्रदर्शितौ। तत्र च दृष्टान्तः अध्यासमात्रम् प्रति, न तु इतरेतराध्यासम् प्रति। शुक्तिरजतदृष्टान्ते स्वीकृतेऽपि नास्ति दोष इति स्वामिनः। शुक्तिरजतस्थलेऽपि कारणाविद्यया कयाचित् किञ्चिदाच्छादितं किञ्चिच्च सृष्टमिति कस्यापि अनुभवो नास्तीति सुगमायां स्वामिभिरुच्यते[3]।

आत्मानात्मनोरितरेतराध्यासस्य युक्त्यसहत्वेऽपि तावता आत्मानात्मनोरितरेतराध्यासो नास्त्येवेति आक्षेपग्रन्थे पूर्वपक्षिणा यदुक्तं तत्र सहमतिः सिद्धान्तिनो नास्ति, तादृशस्याध्यासस्य लोके दृष्टत्वादिति च स्वामिनो व्याख्यास्यन्ति। अत एव परिहारग्रन्थेन अध्यासस्य लोकव्यावहारात् सिद्धिं वदन्ति भगवत्पादाः इति स्वामिनामभिप्रायः।

एवञ्च आत्मानात्मनोरितरेतराध्यासस्य दृष्टान्ताभावात् युक्त्यसहत्वमित्यतः सोऽध्यासो नास्त्येव, ततश्च तन्निवारणाय वेदान्तविचारो नारम्भणीय इत्याक्षेपग्रन्थस्यार्थमङ्गीचक्रुः सुगमाकाराः।

**परिहारग्रन्थस्य भामत्यनुसारि तात्पर्यम्।**

**अध्यासोऽविवेकेन व्याप्तः।**

आक्षेपग्रन्थे भामतीकाराः भेदाग्रहेण अध्यासस्य व्याप्तत्वम् प्रतिपादयन्ति। इदम् पूर्वपक्षावतरणे प्रोक्तमपि भामतीकारैः सिद्धान्तरूपेणैवेदं स्वीकृतम्। विवेकाग्रहेणैव अध्यासो भवतीति भामतीकाराः परिहारग्रन्थेऽसकृदाहुः। आत्मानात्मनोरविवेकेण जाग्रदाद्या अवस्थाः व्याप्ताः। तत्त्वाग्रहणान्यथाग्रहणयोरुल्लेखपूर्वकम् भगवत्पूज्यपादा अपि माण्डूक्यभाष्ये तत्त्वाग्रहणस्य सर्वावस्थाव्यापकत्वं सूचयन्ति। आत्मानात्मनोर्विवेकज्ञानमेव तत्त्वज्ञानम्। तदभावः तत्त्वाग्रहणमित्येवम् भाष्यकारसम्मतिरस्य भामतीसिद्धान्तस्य दृश्यते।

**अध्यासद्वितयम्।**

भामतेरारम्भे समुपनिबद्धे मङ्गलश्लोके "अनिर्वाच्याविद्याद्वितयम्" प्रोक्तम्। व्याख्यातारोऽत्र कारणाविद्यां कार्याविद्याञ्च वर्णयन्ति। केयं कारणाविद्या, का च कार्याविद्येति भामतीकृतः स्वयम् परिहारग्रन्थे ऐदम्प्राथम्येन विशदयन्ति।

तथा हि भाष्यस्थस्य नैसर्गिकपदस्य तात्पर्योद्घाटनकाले मिश्राचार्याः "पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेः उत्तरोत्तराध्यासोपयोग इत्यनादित्वाद् बीजाङ्कुरवत् न परस्पराश्रयत्वम्" इत्याहुः। सत्यानृतयोर्मिथुनीकरणमध्यास इत्यतः ययोर्द्वयोर्मध्ये मिथुनीकरणमिदम् भवति तौ सत्यानृतरूपौ चिदात्मानात्मसङ्घातौ द्वावपि कथमद्वैतिभिरभ्युपगम्यत इति पृच्छायाम् भामतीकाराः पूर्वपूर्वाध्यासैः अनृतमुपस्थाप्यत इत्येवं रीत्या समादधिरे। अनृतस्य हि प्रतीतिमात्रमुपयुज्यतेऽध्यासे इति ह्याहुस्ते बहुत्र भामत्याम्। पूर्वपूर्वाध्यासोपस्थापितम् अनृतम् उत्तरोत्तराध्यासम् प्रति हेतुर्भवति। एवञ्च काचनाध्यासपरम्परा ह्यङ्गीकृता भामतीकारैः। इयञ्च परम्परा बीजाङ्कुरन्यायमनुसरतीत्यतः न दूषणमर्हतीत्यपि ते मन्यन्ते।

[3]सुगमा, पृष्ठसंख्या २५

**परिहारग्रन्थस्य सुगमानुसारि तात्पर्यम्।**

दृष्टान्ताभावात् आत्मानात्मनोरितरेतराध्यासस्य युक्त्यसहत्वमापन्नं चेदपि लोके दृष्टत्वाद् सोऽभ्युपेयः शास्त्रकृद्भिः। अस्ति च प्रसिद्धिः – न हि दृष्टेऽनुपपन्नं नामेति। एवं लोकानुभवमात्रमाश्रित्य युक्त्यसहस्य निरुपादानस्य आत्मानात्मनोरितरेतराध्यासस्य अभ्युपेयत्वम् परिहारग्रन्थस्वारस्यमाहुः सुगमाकाराः।

**अध्यासस्याविवेको निमित्तम्।**

स्वामिनः अध्यासस्योपादानं निरस्यन्तो निमित्तमात्रमुपस्थापयन्ति। तदाहुः – "न हि शुक्तिरजतमुत्पन्नं ततो ज्ञातम् मया, तदनु शुक्तिज्ञानाद् विनष्टञ्चेति मन्यते कश्चिदपि लोके। रजतवत् प्रतीतिस्तु भ्रान्तिकाले सार्वजनीना। […] नन्वस्य प्रतीतेः कार्यत्वात् कारणापेक्षा, ततश्चाज्ञानसिद्धिरित्यध्यवसितम्। नायं साधुरध्यवसायः। अन्तःकरणेन्द्रियदोषनिमित्तादेव शुक्तिज्ञानाभावे प्रतीत्युपपत्तेः। ननु कार्यस्य निमित्तवदुपादानस्याप्यपेक्षणाप्यस्तीति अज्ञानाकाङ्क्षा स्यात्। न स्यात्। भ्रान्तित्वादेव प्रतीत्युपपत्तेः। लोकसिद्धसत्यवस्तुवत् सर्वविधकारणापेक्षत्वे तत एव सत्यत्वापत्तेः।"[4] इति।

परिहारग्रन्थस्थं नैसर्गिकपदमाश्रित्य पूर्वपूर्वाध्यासाः उत्तरोत्तराध्यासम् प्रति कारणीभवन्तीति भमतीमतं स्वामिनः खण्डयन्ति। नैसर्गिक इति पदं व्यवहारविशेषणमेव लक्ष्यते भाष्ये चेदपि व्यवहारस्य नैसर्गिकत्वोक्त्या तत्कारणस्याध्यासस्यैव अविवेकनिमित्तस्य नैसर्गिकत्वमुक्तमिति ध्येयमिति प्रतिपाद्य स्वामिनः नैसर्गिकपदस्य तात्पर्यमेवमाहुः – "निसर्गत एवायमविवेकस्तत्कृताध्यासश्च नात्र कारणमन्वेष्टव्यम्। न ह्यस्ति कारणमविवेकेऽत्यन्तं विविक्तयोः। नाप्यध्यासेऽत्यन्तविरुद्धस्वभावयोः। अविचारितस्वभाव एव त्वत्रापराध्यति। इत्थंस्वभावो हि लोको यदयमनुपपन्नमप्यात्मानात्मनोरध्यासमविवेकेन कृत्वा व्यवहरत्यहमिदम् ममेदमिति चेति"[5] इति। अध्यासकारणान्वषणस्य वैयर्थ्यं हि नैसर्गिकपदेन सूचितमिति सुगमाकाराः मन्यन्ते, नैते अध्यासस्यानादित्वमनेन प्रतिपादितमिति आकलयन्ति।

एवञ्च आत्मानात्मनोरविवेकरूपोऽन्तःकरणदोष एव अध्यासनिमित्तमिति शुद्धशाङ्करवादिनाम् मतं स्थितम्। ननु निमित्तमपि कारणविशेष एवेति अध्यासात् पूर्ववर्ति किमपि कारणं स्वामिभिरप्यङ्गीकृतमिति चेद् अन्यथाग्रहणस्य अविवेकनिमित्तत्वाङ्गीकारः तथा लोकेऽनुभवादेव, उपादानानङ्गीकारस्तु अन्यथाप्रतीतिस्थले कुत्राप्युपादानस्याननुभवादेवेति चाहुः। ननु अध्यासस्य सनिमित्तत्वाङ्गीकारेण अध्यासस्य निमित्तरूपं वा किमपि कारणन्तु युष्माभिरङ्गीकृतमिति चेदत्र समाधीयते स्वामिभिः – "...आत्मैव सत्यं वस्तु नान्यदतोऽस्तीति ज्ञानाभावाद् अज्ञातात्मैव अनात्मरूपेण प्रतिभासत इति निमित्तनैमित्तिकभावोऽवसेयः"[6] इति। एवञ्च भामतीकाराणम् अविवेकादध्यास इति मतं सुगमाकारा अप्यङ्गीकुर्वन्तीति स्थितम्।

एवम् अध्यासनिमित्तमुद्भावयतां स्वामिनाम् मते प्रमाणस्वरूपमीमांसा[7] प्रसिद्धवेदान्तनये यथा तथा न भवति। वस्तुस्वरूपस्य ग्रहणं वा वस्तुनोऽवस्तुरूपेण ग्रहणं वा वस्त्ववस्तुनोर्विषये संशयो वा अज्ञानमथवाऽविद्येत्युच्यते। एवञ्च अग्रहणात्मिकाऽविद्या ग्रहणाभावनिमित्तिका, अध्याससंशयरूपेऽविद्ये तु विवेकाभावनिमित्तिके। ततश्च अग्रहणात्मकाविद्यास्थले ग्रहणमेव विद्या स्यात्, अध्याससंशयस्थले तु विवेक एव विद्या। अनया पद्धत्या प्रमाणस्वरूपमीमांसा शुद्धशाङ्करनये विस्तारणीया वर्तते। न सा विवरणादिप्रस्थानगतैः वेदान्तपरिभाषादिग्रन्थे यथा तथा

[4]सुगमा, पृष्ठसंख्या २७

[5]सुगमा, पृष्ठसंख्या १२

[6]सुगमा, पृष्ठसंख्या १०

[7]प्रमाणस्वरूपमीमांसा - Epistemology.

सुव्यवस्थापिता शुद्धशाङ्करप्रस्थानानुसारिभिरेतावता।

**अध्यासस्योपादानं नास्ति।**

एवम् अध्यासस्य सनिमित्तत्वम् प्रतिपादयन्तः स्वामिनः अविद्यायाः सोपादानत्वन्तु निरस्यन्ति। अतः पञ्चपादिकेष्टसिद्धिविवरणादिकारैः प्राचीनाचार्यैरध्यासस्य मूलाविद्यानाम्ना प्रसिद्धं शक्तिद्वयसमन्वितम् भावरूपं यदुपादानमुक्तं तद् भाष्यविरुद्धमाहुः स्वामिनः।

तदध्यासम् पुरस्कृत्यैव यदि स्यात् तर्हि अध्यारोप एव तैरयं कृतः स्यात्। ततश्चापवादेनाध्यासे निवृत्ते सह कार्येण अविद्याऽशेषतो निवर्तत इत्यपि वक्तव्यम्। नैवं तैरुच्यते। मूलाविद्यावादिभिः जीवन्मुक्तस्यापि अविद्यालेशोऽनुवर्तते इति खलूच्यते, यत् परिहसन् श्रीमान् श्रीनिवासरावः आह – "शुद्धचितोऽविद्यायाश्च सहावस्थानरूपं शक्यकल्प्यम् अतिसूक्ष्मं द्वैतम् मूलाविद्यावादिभिर्बन्धावस्थायाम् अङ्गीकृतमिति यत् तद् अयुक्तमेव, किन्तु तद् द्वैतं तैर्जीवन्मुक्तावप्यङ्गीकृतमिति यत् तत्तु अयुक्ततरम्।"[8] इति। अतोऽध्यासपरिधेर्बहिरेव विद्यमानं किमपि कारणमिदं तैरुद्भावितमिति स्थितम्। एवमुद्भाविते चाद्वैतविरोधो भवेदिति विशङ्क्य ते तत्परिहाराय भावाद्वैत-सत्ताद्वय-सत्तात्रयादिवादान् आश्रयन्ते स्म। एवञ्च अध्यारोपापवादप्रक्रियापरिधिः सङ्कुचिता जाता एतेषामाचार्याणां नये। भाष्यकारभगवत्पादानां नये तु अध्यासपुरस्सरा एव लौकिकाः वैदिकाश्च सर्वे प्रमाणप्रमेयव्यवहाराः[9]। अध्यासस्य हेतून्नयनमप्यध्यासपरिधिं नोल्लङ्घते। अतोऽध्यासकारणं यदुद्भावितं तदप्यध्यारोपापवादप्रक्रियाक्षेत्रेऽन्तर्भवति। अध्यासे विनिवृत्ते अध्यारोपितमखिलमप्यशेषतो विनिवर्तते। अतो भाष्याकारभगवत्पादैराश्रितया अध्यारोपापवादप्रक्रियया तेषां विरोधो दृढ इत्ययम् प्रथमो दोषः।

तथा हि, इयं या मूलाविद्या जीवाध्यासप्राग्भाविनी अध्यासबाधेनाबाध्यमाना चिदात्मना सह सततमनुवर्तमाना सती आत्माद्वैतसिद्धान्तविघटनासमर्थाऽपि अध्यासादिसकलानर्थसङ्घटनपटीयसी पञ्चपादिकादिप्रचलितसम्प्रदायावलम्बिभिः समादृता, तस्याः कार्याणि आत्मानात्मनोरितरेतराध्यासस्थले आरोप्यन्ते इत्यङ्गीकृतम्। एवञ्च अध्यासे यदारोप्यं तत् अध्यासात् पूर्ववर्ति इति मतमागतम्। किन्तु कथमिदम् भाष्यवाक्यैः साङ्गत्यम् भजन्ते। अध्यासभाष्ये अहम्प्रत्ययिनोऽशेषस्वप्रचारसाक्षिणि चिदात्मन्यध्यासः, चिदात्मनश्चान्तःकरणादिष्वध्यासो भवतीत्युक्तम्। तत्र भाष्यवाक्ये अनात्मनः तद्धर्माणाञ्च आत्मनि, आत्मनः तद्धर्माणाञ्च अनात्मन्यध्यासो भवतीति साक्षादेवानुक्त्वा अहम्प्रत्ययिनश्चिदात्मनि, चिदात्मनोऽन्तःकरणादिषु चाध्यासो भवतीत्येवोक्तम्। अन्तःकरणादिकमेव अनात्मा उपाधिः। चिदात्मा च आत्मा। तत्र आनात्मानोऽध्यासात् पूर्वमेवोपस्थिताश्चेत् अन्तःकरणादीनाम् उपाधीनाम् अनात्मनाम् आत्मन्यध्यास इत्येवमध्यासवर्णनम् आरम्भणीयमस्ति। प्रत्युत तत्र भगवत्पादा अहम्प्रत्ययिन आत्मन्यध्यासे आरम्भं कृतवन्तः। कोऽयम् अहम्प्रत्ययीति चेत्तदुच्यते – जीव एवायम्[10]। अन्तःकरणोपाधिविशिष्टं चैतन्यमेव, सोपाधिक आत्मैव अयम् अहम्प्रत्ययी। अस्य सोपाधिकस्यात्मनः शुद्धात्मनि, शुद्धात्मनश्च उपाधिषु अध्यास उक्तो भाष्यकारभगवत्पादैः। किमत्र कारणम्। उच्यते – अध्यासः कस्य भवतीति प्रश्ने सोपाधिकस्य आत्मन एवाध्यासो भवतीति सिद्ध्यति। यथा रजतस्य अध्यासो भवति। किन्तु रजतम् अध्यासानन्तरमेव सिद्ध्यति। अध्यासानन्तरं यत्सिद्धं तदेव अध्यासप्रक्रियायाम् आरोप्यत्वेन वयं गृह्णीमः – रजतं शुक्तौ अध्यस्यते इति व्यवहारः। एवमेव उपाधिमात्रस्य अध्यास इति वक्तव्ये सोपाधिकस्य आत्मनोऽध्यास इति व्यवहारः। किन्तु

[8]Vedanta Without Maya?, *"Striking At The Very Root: Sacchidanandendra Saraswati's Refutation Of Saptavidhanupapatti"*, P.253

[9] "तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासम् पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि" – अध्यासभाष्यम्।

[10]"जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान्।" – माण्डूक्यकारिका २.१६

सोपाधिक आत्मा अध्यासानन्तरमेव सिद्ध्यति। तथापि स एव सोपाधिक आत्मा आत्मानात्मनोरितरेतराध्यासे आरोप्यकोटौ भाष्यकारभगवत्पादैर्गृहीतः। तस्माद् भगवत्पादैरध्यासपरिधेर्बहिः कार्यरूपं वा कारणरूपं वा किमप्यनृतं नैवोपदिष्टमवगम्यते, येन मूलाविद्यावादः पुष्येत।

किञ्च सुषुप्त्यवस्थायाम् मूलाविद्यायाः सत्त्वं यदुक्तम् पूर्वाचार्यप्रक्रियानुसारिभिः तत्र न किमपि कारणम् अवस्थापरीक्षणपरायणैरुद्दश्यते। सुषुप्तौ अग्रहणात्मिका अवस्था या काचनानुभूयते सा भावरूपा मूलाविद्याऽस्तीति यदुच्यते तदपि न परिशुद्ध्यति। तथा ह्याह श्रीनिवासरावः – "सुषुप्तौ मिथ्याज्ञानाभावेऽपि ब्रह्मस्वरूपं न गृह्यत इत्येतत् तत्रावस्थायाम् अविद्याया अस्तित्वम् प्रति मूलाविद्यावादिभिः प्रबलमेकम् प्रमाणमभिमतम्। मिथ्याज्ञानस्य अत्यन्ताभावेऽपि ज्ञानं नोदेति चेत् तत्र कारणं सुषुप्तावभिव्याप्तस्य भावरूपस्य कस्यचिदज्ञानस्य सत्त्वमेव स्यात्। अस्य पक्षस्य निरासोऽपि विस्तरेण क्रियते सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः। सुषुप्तौ ज्ञानानुदयम् प्रति ज्ञानोपदेशाभाव एव कारणं वदन्ति स्वामिनः। केवलं ज्ञानोपदेशेनैव तस्यामवस्थायां ज्ञानाभावो निवर्तेत इति तेषामभिप्रायः।"[11] इति।

न च सुषुप्त्यवस्था स्वप्नाद्यवस्थानां कारणम् भवति। तत्त्वाग्रहणं स्वप्नजागरितावस्थयोरपि वर्तते। तच्च तत्त्वाग्रहणं न किमपि वस्तुसत् येन खलु तत् परिणमेत। तस्मात् सुषुप्तावनुभूयमानस्य कस्यचित् भावरूपस्य अग्रहणात्मकस्याज्ञानस्य परिणामेन जाताः स्वप्नजाग्रदवस्थाकाः पदार्थाः इति तु नास्ति। साक्षिस्वरूपभिन्नं विषयेन्द्रियजातम् अखिलमपि मन एव। मन एव जगत्, मन एव स्वप्नो जाग्रच्च। सुषुप्त्यवस्था तु न मनः, ग्रहीतृग्रहणग्राह्यानां तदा अननुभवात्। ननु स्वप्नजागरितावस्थयोः यन्मनः तदेव सूक्ष्मरूपेण स्वकारणात्मना वा सुषुप्तावप्यासीद् इत्यङ्गीकार्यमिति चेद् अवश्यं तन्न। अर्थापत्तिप्रमाणेन खल्वेवं तर्क्यते, अनुभवस्तु ततोऽपि दृढतरम् प्रमाणम्। अर्थापत्त्या कल्पितं साधु, सार्वत्रिकपूर्णानुभवेन सिद्धन्तु असाधु इति किमिदम् परीक्षणपटुत्वम्। सार्वत्रिकः पूर्णश्च योऽनुभवः अवस्थात्रयपरीक्षाश्रयः तेन इदमेव सिद्धम् – सुषुप्तौ मनो नास्ति, स्वप्नजागरितयोः मनः प्रतीयत इति। अस्य सार्वत्रिकपूर्णानुभवसिद्धस्य सिद्धान्तस्य अप्रामाण्यम्, अर्थापत्त्या कल्पितस्यार्थस्य प्रामाण्यञ्चेति तु परीक्षकैरङ्गीकर्तुमयोग्यं वचः।

आत्मानात्मनोर्मध्ये सहानवस्थानलक्षणं विरोधं निरस्य परस्परानात्मतालक्षणविरोधमेव स्वीकुर्वद्भिः पञ्चपादिकाकारैः भाष्यतात्पर्यम् अन्यथाकृतमिति स्वामिनो मन्यन्ते। तथा हि पञ्चपादिकायाम् आत्मानात्मनोर्मध्ये द्विविधो विरोधः सम्भावितः। तत्र प्रथमो विरोधः सहानवस्थानलक्षणः। द्वितीयस्तु परस्परानात्मतालक्षणः। द्विविधयोरनयोर्विरोधयोः द्वितीयमङ्गीकुर्वन्ति आचार्याः।[12] एवञ्च प्रथमस्य विरोधस्य अनभीष्टत्वं हि सूचितम्। आत्मानात्मनोर्मध्ये सहानवस्थानेऽनभीष्टे सहावस्थानमेव अभीष्टमिति पर्यवस्यति। किन्तु आत्मानात्मनोः तमःप्रकाशवत् सदसतोः विरुद्धस्वभावत्वे शास्त्रदृष्ट्या सिद्धान्तिते तत्र पुनः सहावस्थानन्तु तयोः सम्भवतीति नैव युक्तं वक्तुमिति स्वामिनामाशयोऽवगम्यते। केवलम् आत्मन एव सत्त्वमिति दृष्ट्या हि शास्त्रीयया आत्मानात्मनोर्विरोधो भाष्यकारभगवत्पादैः सिद्धान्तितः, तत्र तयोः सहावस्थानं वदता पञ्चपादिकाकृता द्वयोरपि तयोः सत्त्वमङ्गीकृतम्। अनात्मा तु नास्त्येव, कथं तस्य आत्मना सहावस्थानमुच्यते। ननु अनात्मा नाभावरूपः प्रतीयमानत्वात् इति चेन्न, अभावस्वरूपोऽपि प्रतीयते यथा शुक्तिरजतं यथा वा रज्जुसर्पो यथा वा द्वितीयचन्द्रः। ननु अत्यन्तासतः अयं न दृष्टान्तः अपि तु वन्ध्यापुत्रो वा शशशृङ्गो वा तस्य दृष्टान्तो वाच्यः, तौ च न प्रतीयेते इति चेन्न, बुद्धौ प्रतीयत एव अन्यथा त्वयाऽत्र न निदर्श्येत। एवञ्च अत्यन्तमसत् अप्रतीयमानञ्चेत्यत्र नास्ति किमपि निदर्शनम्। तस्मात् शुक्तिरजतादिकं शशशृङ्गादिकञ्चेति अविद्यमानपदार्थेषु कोटिद्वयं

[11] Vedanta Without Maya?, *"Striking At The Very Root: Sacchidanandendra Saraswati's Refutation Of Saptavidhanupapatti"*, P.254

[12] पञ्चपादिका (महेशानुसन्धानसंस्थानम्), पृष्ठसंख्या ३४-३६

यत्सम्भावितं कैश्चित् वेदान्तिभिः तन्न सङ्गच्छते। ननु आत्मानात्मनोः तमःप्रकाशवदिति दृष्टान्तो भाष्यकारभगवत्पादैः प्रदर्शितः, तमश्च नाभावरूपमिति पूर्वतन्त्रीयैराचार्यैः सिद्धान्तितम् इति चेन्न, तमः अभावरूपमित्येव भाष्यप्रक्रियामाश्रितानां सिद्धान्तः। पूर्वतन्त्रीयैरुक्तं सर्वं तथैव गलादधःकर्तव्यमिति तु नास्ति। अन्यथा कर्मणैव मुक्तिरित्यपि ग्राह्यमापतति। शुक्तावध्यस्तं रजतम् असदेव, न तु त्रिकालेऽप्यस्ति तत्, यस्तु भावस्तस्य प्रतीयते सोऽधिष्ठानगत एवेत्ययं हि भाष्येषु साक्षाच्छ्रुतः सिद्धान्तः। तद्यथा – "न हि रज्ज्वाम् भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तः"[13], "न हि मनोविकल्पनाया रज्जुसर्पलक्षणाया रज्ज्वाम् प्रलय उत्पत्तिर्वा"[14], "असदेव तर्हि सर्वं यद्गृह्यते रज्जुरिव सर्पाद्याकारेण। न, सत एव द्वैतभेदेन अन्यथागृह्यमाणत्वात् न अत्त्वं कस्यचित् क्वचिदिति ब्रूमः। यथा सतोऽन्यद्वस्त्वन्तरम् परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाचोर्ध्वम् असत्त्वम् ब्रुवते तार्किकाः, न तथा अस्माभिः कदाचित् क्वचिदपि सतोऽन्यदभिधानम् अभिधेयं वा वस्तु परिकल्प्यते। सदेव तु सर्वमभिधानमभिधीयते च यदन्यबुद्ध्या, यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते"[15] इति।

एवम् पूर्वाचार्यप्रक्रियानुसारिणाम् अध्यासोपादानत्वेनाभिमतायाः मूलाविद्यायाः स्वीकारे बहुविधदोषकालुष्यापातमुद्भावयन्तोऽनुरुन्धते स्वामिनः – "अध्यासस्योपादानत्वेन अभिमतम् अज्ञानं किम् आध्यासिकम् उत नेति वक्तव्यम्। तत्र आध्यासिकत्वे कथम् पूर्वसिद्धस्याध्यासस्य स्वकल्पिताज्ञानोपादानकत्वं सम्भवि। अनाध्यासिकत्वे त्वात्मवत् तस्यापि सत्यत्वमेव प्राप्नोतीत्यनिष्टप्रसङ्गः"[16] इति, "मिथ्याभूतम् अज्ञानम् अध्यासोपादानकारणमिति कालकर्मादिलक्षणतन्निमित्तरूपेणापि परिणमत इति च ब्रुवता वक्तव्यम्, किं कार्यकारणभावो नाध्यासिकः, परिणामप्रक्रिया वा नाध्यासिकीति। यद्युभयत्राप्याध्यासिकत्वाभ्युपगमः, ततोऽध्यासकृतस्य कथम् अध्यासहेतुत्वम्। अथानभ्युपगमः, तर्हि संसारकारणमज्ञानम् अध्यासादिरूपेण सदैव परिणंस्यते कस्तस्य निवारकः स्यात्। न ह्यनध्यस्तं ज्ञानेन शक्यनिवर्तनमिति वृथैव ज्ञानोपदेश इति पुनरप्यनिष्टप्रसङ्ग एव।"[17] इति च।अध्यासो निरुपादान इति शुद्धशाङ्करनये स्थिते केचन मूलाविद्यासमर्थकाः विद्वांसः स्वामिनामेवमुपपादने हेतुमन्विषन्तो विभ्राम्यन्ति। पूर्वपूर्वाध्यासेनैव उत्तरोत्तराध्यासाः सिद्ध्यन्तीति मत्वा स्वामिनो निरुपादानम् अध्यासं वदन्तीति केचिदाहुः। मूलाविद्यां तिरस्कुर्वतः वेदान्तव्याख्यातॄन् दूरतः कटाक्षयन् श्रीमान् राजेश्वरशास्त्री द्राविडः आह – "अथ कश्चनाक्षेप उन्नीयेत। तथा हि, देहेन्द्रियादीनाम् अध्यासः निरन्तरप्रवाहरूपो भवतीत्यतः पूर्वपूर्वाध्यास उत्तरोत्तराध्यासम् प्रति हेतुर्भवति। एवं सति अध्यासकारणसिद्ध्यर्थम् मूलाविद्याङ्गीकारोऽनावश्यकः"[18] इति। अत्र शास्त्रिणा स्वामिनाम् मतम् पूर्वपक्षीकृतमिति खलु केचन मन्यन्ते। नैतत् साधु। अध्यासे कार्यकारणभावं निराकुर्वन्तः स्वामिनः पूर्वपूर्वाध्यासा उत्तरोत्तराध्यासम् प्रति कारणम् भवन्तीति न स्वीकुर्वन्ति। प्रत्यध्यासम् अविवेको निमित्तम्, न त्वेकम् अध्यासम् प्रति अपरोऽध्यासो निमित्तम्। अत एव स्वामिभिरध्यासभाष्यव्याख्यानावसरे 'पूर्वबुद्ध्यध्यासात् संस्काराद्यध्यासः, ततस्तादृगुत्तरबुद्ध्यध्यास इति प्रवाहात्मना प्रवाह्युपादानजाड्यात्मना वा अनादित्वम्' इति मतम् पूर्वपक्षत्वेन उल्लिख्यते[19]। भाष्यकारभगवत्पादैः अध्यासभाष्ये प्रयुक्तानि अनाद्यनन्तनैसर्गिकविशेषणानि त्रीणि समाश्रित्य प्रवृत्तमिदम् मतम् 'एकदेशिनां व्याख्यानम्' इति निर्दिष्टं स्वामिभिः। एकदेशिमतं तैरित्थं निराकृतम् – "तदेतत्सर्वं व्याख्यानजालं

---

[13]माण्डूक्यकारिकाभाष्यम् १।१३

[14]माण्डूक्यकारिकाभाष्यम् २।३२

[15]छान्दोग्योपनिषद्भाष्यम् ६।२।३

[16]सुगमा, पृष्ठसंख्या १४

[17]सुगमा, पृष्ठसंख्या १५

[18]Preceptors of Advaita, *Amalananda* (Article No.24), P.162

[19]सुगमा, पृष्ठसंख्या ९७

कार्यकारणाध्यासद्वयनिराकरणेन अनिर्वचनीयवस्तूत्पत्तिनिराकरणेन च निराकृतप्रायमित्युपेक्ष्यते"[20] इति।

**अध्यासरूपाविद्यायाः हेतुस्वरूपकार्याणि।**

अध्यासस्य हेतुरित्यत्र निमित्तमात्रमुच्यते, अध्यासोपादानस्य शुद्धशाङ्करनयेऽनङ्गीकारात्। स्वरूपमिति येन रूपेणाध्यासोऽनुभवगम्यः तदेवोच्यते। कार्यमिति चान्वयव्यतिरेकाभ्यां यदवगतम् अध्यासस्य फलं तदेव। अध्यासभाष्यस्य परिहारग्रन्थे एतत्त्रयमप्यवगम्यते। तथा हि, आत्मानात्मनोरन्योन्यात्मकताऽऽकलनरूपम् अन्योन्यधर्मवत्ताऽऽकलनरूपञ्च मिथ्याज्ञानम् अध्यासरूपाविद्यायाः स्वरूपम्। आत्मानात्मनोरितरेतरविवेकाभावः अध्यासरूपाविद्यायाः निमित्तम्। अनृतरूपस्यानात्मनः प्रत्युपस्थापनम्, ततश्च प्रमाणप्रमेयव्यवहारः, कर्तृत्वभोक्तृत्वव्यवहारश्च तस्याः कार्यम्।[21]

**उपसंहारः।**

ब्रह्मसूत्रशाङ्करभाष्यस्य आदिमव्याख्यानेष्वन्यतमा हि भामती। सा पुनर्विशेषव्याख्यानरीतिं हि वेदान्तशास्त्रस्य काञ्चित् प्रस्तौति। सुगमा तु अधुनिकाऽपि भाष्योक्तीराधारीकृत्य अध्यारोपापवादप्रक्रियायाम् अधिकम् प्राधान्यमावहन्ती शुद्धशाङ्कराख्यां काञ्चिन्नवीनाम् प्रक्रियाम् प्रस्तुवन्ती विराजते। शाङ्करवेदान्तशास्त्रार्थसौधस्य कुञ्चिकाभूतस्य अध्यासभाष्यस्य शङ्कापरिहारग्रन्थविवरणकाले एव एते व्याख्याने स्वकीयप्रक्रियागतं वैशिष्ट्यम् अध्येतृणाम् बुद्धिमारोपयतः इत्येतद्धि प्रकृतनिरूपणेऽस्माभिः परिलक्षितम्। वैशिष्ट्यञ्च व्याख्यानयोरनयोस्तावदिदम् – भामतीमते कार्यकारणरूपाध्यासपरम्परा अभ्युपगता, सुगमामते तु सा नाभ्युपगता, सुगमाकारेण मूलाविद्येति नाम्ना इष्टसिद्ध्यादिप्रस्थानप्रसिद्धा कारणाविद्या निरस्ता चेति। सामञ्जस्यञ्च एतयोरत्रैव किञ्चिद्दृष्टम् – अध्यासस्य अविवेकहेतुत्वं द्वाभ्यामपि व्याख्यानाभ्यामङ्गीकृतमित्येतत्।

शाङ्करभाष्यव्याख्यानक्षेत्रे प्राचीनप्रस्थानस्य शुद्धशाङ्करप्रस्थानस्य च सामान्यविशेषार्थानां विचारविस्तारः शाङ्करदर्शनमधिकृत्य शोधकार्येषु प्रवर्तमानानाम् महोपकारको भविष्यतीत्युपलभ्य सोऽत्रैवं तावत् भाष्यांशं कञ्चिदधिकृत्य यथाप्रतिभानम् प्रदर्शित इति भगवत्पादस्मरणम्॥

[20]सुगमा, पृष्ठसंख्या ९८

[21]द्रष्टव्या – विशुद्धवेदान्तपरिभाषा, पृष्ठसंख्या ४

**परिहारग्रन्थे भामती।**

| परिहारग्रन्थवचांसि | भामतीवचांसि |
|---|---|
| तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्मान् च अध्यस्य | [अन्योन्यस्मिन् अन्योन्यात्मकताम्... अध्यस्य... अहमिदम् इति... लोकव्यवहारः =] "अन्योन्यस्मिन् धर्मिणि आत्मशरीरादौ अन्योन्यात्मकताम् अध्यस्य अहमिदं शरीरादीति... लोकव्यवहारः..., स च अयमहम् इति व्यपदेशः। इतिशब्दसूचितश्च शरीराद्यनुकूलम् प्रतिकूलञ्च प्रमेयजातम् प्रमाय प्रमाणेन तदुपादानपरिवर्जनादिः।" (पृ.९)<br>[अन्योन्यस्मिन्... अन्योन्यधर्मांश्च अध्यस्य... ममेदम् इति... लोकव्यवहारः =] "अन्योन्यस्मिन् धर्मिणि देहादिधर्मान् जन्ममरणजराव्याध्यादीन् आत्मनि धर्मिणि अध्यस्तदेहादिभावे समारोप्य, तथा चैतन्यादीन् आत्मधर्मान् देहादौ अध्यस्तात्मभावे समारोप्य, ममेदं जरामरणपुत्रपशुस्वाम्यादीति व्यवहारो व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः।" (पृ.९) |
| इतरेतराविवेकेन | "विवेकाग्रहेण" (पृ. ९) |
| अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः | "परमार्थतो धर्मिणोः अतादात्म्यं विवेको धर्माणाञ्च असङ्कीर्णता विवेकः" (पृ.९)<br>"मिथ्याज्ञानम् अध्यासः तन्निमित्तः" (पृ. ९) |
| सत्यानृते मिथुनीकृत्य | "विवेकाग्रहाद् अध्यस्य इति योजना। सत्यं चिदात्मा, अनृतम् बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी मिथुनीकृत्य युगलीकृत्य इत्यर्थः।" (पृ.९) |
| अहमिदम् ममेदम् इति | "अन्योन्यस्मिन् धर्मिणि... अन्योन्यातमकताम् अध्यस्य अहमिदं शरीरादीति... लोकव्यवहारः..., स च अयमहम् इति व्यपदेशः। इतिशब्दसूचितश्च शरीराद्यनुकूलम् प्रतिकूलञ्च प्रमेयजातम् प्रमाय प्रमाणेन तदुपादानपरिवर्जनादिः।" (पृ.९)<br>"अन्योन्यस्मिन् धर्मिणि देहादिधर्मान्... आत्मनि धर्मिणि... समारोप्य, तथा चैतन्यादीन् आत्मधर्मान् देहादौ... समारोप्य, ममेदं जरामरणपुत्रपशुस्वाम्यादीति व्यवहारो व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः।" (पृ.९) |
| नैसर्गिकः | "आरोप्यस्य प्रतीतौ सत्याम् पूर्वदृष्टस्य समारोपः, समारोपनिबन्धना च प्रतीतिः इति दुर्वारम् परस्पराश्रयत्वम् इत्यत आह नैसर्गिक इति। स्वाभाविकोऽनादिरयं व्यवहारः। व्यवहारानादितया तत्कारणस्य अध्यासस्य अनादिता उक्ता। ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेः उत्तरोत्तराध्यासोपयोग इत्यनादित्वाद् बीजाङ्कुरवत् न परस्पराश्रयत्वम् इत्यर्थः।" (पृ.१०) |
| अयम् लोकव्यवहारः | "लोकव्यवहारो लोकानां व्यवहारः" (पृ.९) |

**परिहारग्रन्थे सुगमा।**

| परिहारग्रन्थवचांसि | सुगमावचांसि |
|---|---|
| तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्मान् च अध्यस्य | "अस्मत्प्रत्ययगोचरे युष्मत्प्रत्ययगोचरतां विषयिणि विषयात्मकतां चिदात्मके जडात्मकतां तद्वैपरीत्येन युष्मत्प्रत्ययगोचरे अस्मत्प्रत्ययगोचरतां विषये विषयितां जडात्मके चिदात्मकताञ्च अध्यस्यैव व्यवहरति लोकः। तथा... अन्यस्मिन् हि विषयिणि अन्यधर्मान् विषयधर्मान् तद्वैपरीत्येन चान्यस्मिन् विषये अन्यस्य विषयिणो धर्मांश्चाध्यस्यैव व्यवहरतीति सिद्धम्।" (पृ. |
| इतरेतराविवेकेन | "'इतरेतराविवेकेन मिथ्याज्ञाननिमित्तः' इति 'अविवेकोत्थं यन्मिथ्याज्ञानं तन्निमित्तः' इत्यर्थः। गमकत्वात् समासः। अथवा अविवेकेन अध्यस्येति पूर्वेणैव अन्वयः। अध्यासमिथ्याज्ञानयोरैक्यात् उभयथापि यथोक्त एवाभिप्रायः।" (पृ.१०)<br>[मिथ्याज्ञानम् अविद्या, सा च अध्यासकारणम् इति विवरणीयाः]<br>"सोऽयमविवेक अध्यासे निमित्तम्। तदुक्तं गीताभाष्ये – क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोः इतरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् (गी. भा. १३.२६) इति।" (पृ.९) |
| अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः | "चिदात्मा तावदेको धर्मी, अनात्मा चापरः। तयोरितरेतराविवेको नाम इतरस्मादितरस्य यो विवेकः – एवंस्वभावश्चिदात्मा तद्विरुद्धस्वभावश्चानात्मा – इति विविच्य निर्धारणम्, तदभावः। तथा धर्मांश्च चिदात्मनः चैतन्यम्, कूटस्थत्वम्, विषयित्वम्, सत्यत्वम्, सुखदुःखसंस्पर्शविधुरत्वम्, निरंशत्वम् इत्येवमादयः। अनात्मनस्तु जडत्वम्, विकारित्वम्, विषयत्वम्, मिथ्यात्वम्, सुखदुःखात्मकत्वम्, सांशत्वम् इत्येवमादयः। अमीषां धर्माणामविवेकः – अस्य धर्मिण इमे धर्माः – इति निर्धारणाभावः। सोऽयमविवेक अध्यासे निमित्तम्। तदुक्तं गीताभाष्ये – क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् (गी. भा. १३.२६) इति।" (पृ.९)<br>"यद्यपि चैतन्यादयो नाम नात्मनः सकाशात् पृथग्विद्यन्ते धर्माः नित्यनिर्विशेषचैतन्यस्वरूपत्वादात्मनः, न चात्मनि द्रव्यगुणकर्मादिभेदेन धर्मधर्मिभावं वैशेषिकादिवदभ्युपयन्ति वेदान्तिनः परमार्थतः, न चाप्यनात्मा नामात्मनोऽत्यन्तभिन्न एव तत्त्वान्यत्वाभ्यामनिर्वचनीयस्वरूपत्वात् सलिलफेनवत्, तथापि चित्स्वरूपानेव चैतन्यादीन् उपाध्यपेक्षया तत्पृथग्भूतानिव प्रकल्प्य तेषां तद्धर्मत्वेन व्यपदेशः। व्यावहारिकं चानात्मनः प्रातीतिकसत्त्वं धर्मधर्मिभावञ्च यथाप्रसिद्धमेवाभ्युपगम्य जडत्वादीनां तद्धर्मत्वेन व्यपदेशश्चेति नात्र व्याघातशङ्कावकाशः।" (पृ.१०) |
| सत्यानृते मिथुनीकृत्य | "चिदात्मा स्वरूपाव्यभिचारात् सत्यः। अनृतश्चानात्मा, स्वरूपव्यभिचारात्।" (पृ.११)<br>"...मिथुनीकरणम् बुद्धौ मिथःसम्बन्धतापादनम्, तदेतन्मिथ्याज्ञानम् अध्यासशब्दव्यपदेश्यम्" (पृ.१२) |
| अहमिदम् ममेदम् इति | "अहम् इति अस्मत्प्रत्ययगोचरस्य आत्मनो व्यवहारः। इदम् इति तु विषयांशस्य युष्मत्प्रत्ययगोचरस्य |

| | |
|---|---|
| | तत्सम्भिन्नस्य व्यवहारः।... अहम् मनुष्यः, अहम् ब्राह्मणः... इत्यादिरीत्या... व्यवहारस्य सामान्याकारप्रदर्शनम् अहमिदम् इति।... एवम् ममेदम् इति प्रत्ययव्यपदेशावपि व्याख्येयौ। प्रत्येति हि व्यपदिशति च लोको ममायम् पुत्रः, ममेदम् मित्रम्, ममेदं गृहम् इत्येवम्। तत्र मम इति अस्मत्प्रत्ययगोचरस्य आत्मनः सम्बन्धप्रत्ययव्यपदेशौ।" (पृ.७-८) |
| नैसर्गिकः | "निसर्गत एव ह्यविचारस्वभावात् सर्वोऽपि व्यवहरन् दृश्यते" (पृ.७) "यद्यपि नैसर्गिक इति व्यवहारविशेषणं लक्ष्यते भाष्ये तथापि व्यवहारस्य नैसर्गिकत्वोक्त्या तत्कारणस्य अध्यासस्यैव अविवेकनिमित्तस्य नैसर्गिकत्वमुक्तम् इति ध्येयम्। इदमुक्तम् भवति – निसर्गत एव अयम् अविवेकः तत्कृताध्यासश्च, नात्र कारणमन्वेष्टव्यम्। न ह्यस्ति कारणम् अविवेकेऽत्यन्तं विविक्तयोः। नापि अध्यासे अत्यन्तविरुद्धस्वभावयोः। अविचारस्वभाव एव त्वत्र अपराध्यति। इत्थंस्वभावो हि लोको यदयम् अनुपपन्नमपि आत्मानात्मनोरध्यासम् अविवेकेन कृत्वा व्यवहरति अहमिदम् ममेदमिति चेति" (पृ.१२) |
| अयम् लोकव्यवहारः | [लोकशब्दस्य जनः इति वा जगत् इति वा प्रसिद्ध एवार्थः स्वीकृतः] |


**आश्रितग्रन्थसूची।**

**संस्कृतग्रन्थाः।**

1. शास्त्री,आचार्यः जगदीशः (सम्पादकः)। ब्रह्मसूत्रशाङ्करभाष्यम्। मोतिलाल् बनारसीदास्। दिल्ली। २०१० (प्रथममुद्रणम् - १९८०)।
2. श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः (यल्लम्बळसी सुब्रह्मण्यशर्मा)। मूलाविद्यानिरासः अथवा श्रीशङ्करहृदयम्। अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। २००९ (प्रथमप्रकाशनम् - १९२९)।
3. श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः। पञ्चपादिकाप्रस्थानम्। अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। १९६६।
4. श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः। विशुद्धवेदान्तपरिभाषा। अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। १९६९।
5. श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः। वेदान्तप्रक्रियाप्रत्यभिज्ञा। अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। १९६४।
6. श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः। शुद्धशाङ्करप्रक्रियाभास्करः (भागाः १-७)। अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। १९६४।
7. श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः। सुगमा (श्रीशाङ्करीयाध्यासभाष्यव्याख्या)। अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। १९९९ (प्रथमप्रकाशनम् - १९५५)।
8. Gangolli DB. Sri Satchidanandendra Saraswati Swamiji – An Advent of Adi Sankaracharya in Our Own Times. Adhyatma Prakasha Karyalaya. Holenarsipur, 1997.
9. Hirst Jacqueline G. Suthren. Samkara's Advaita Vedanta – A Way of Teaching. Routledge Curzon. Abingdon, Oxon: 2005.
10. Iyer, K A Krishnaswami. Vedanta or the Science of Reality. Ganesh & Co. Madras, 1930.
11. Kulkarni Devarao. Teaching Of Brahman through the Attributions of Avidya and Maya. Manas Kumar Sanyal (Pulisher), Calcutta, 1989.
12. Mahadevan TMP (Ed.). Preceptors of Advaita. Samata Books. Chennai, 2003. (First published in 1968).
13. Roodurmun PS. Bhamati and Vivarana Schools Of Advaita Vedanta – A Critical Approach, Motilal Banarsidass Publishers PVT. LTD., Delhi, 2002.
14. Sarma Candradhara. The Advaita Tradition In Indian Philosophy: A Study Of Advaita In Buddhism, Vedanta And Kashmira Shaivism, Motilal Banarsidass. Delhi, 1996.